# सिद्धान्तकौमुदी :तिङन्तप्रकरणम्

**सूत्र- तिङ्स्त्रीणि त्रीणि प्रथममध्यमोत्तमाः १।४।१०१**

तिङ उभयोः पदयोस्त्रयस्त्रिकाः क्रमादेतत्संज्ञाः स्युः ॥

अथ प्रथमादिपुरुषेषु एकैकस्मिन्पुरुषे प्रत्ययत्रिकात्मके युगपत्पर्यायेण वा एकैकप्रत्यये प्राप्ते"द्व्येकयोर्दविवचनैकवचने" "बहुषु बहुवचन"मिति व्यवस्तार्थमेकवचनादिसंज्ञामाह--तान्येक। तच्छब्देन पूर्वसूत्रोपात्तानि प्रथममध्यमोत्तमाख्यानि तिङस्त्रीणि त्रीणि परामृश्यन्ते। तदाह-- लब्धप्रथमादिसंज्ञानीति। "एकश"इत्यस्य विवरणं--प्रत्येकमिति। "सङ्ख्यैकवचनाच्च वीप्सायाया"मिति शसिति भावः।

ठतानी"त्यस्यव्याख्यानं--लब्धेत्यादि।

अन्यथैकसंज्ञाधिकारात्प्रथमादिसंज्ञानामेकवचनादिसंज्ञानां च पर्यायः स्यात्। इष्टापत्तौ तुअत्तेर्लोटो"मेर्नि"रितिकृतेएकत्वविवक्षायामुत्तमसंज्ञाऽभावात्"आडुत्तमस्ये" त्यस्याऽप्रवृत्त्याअन्नीत्यादिप्रयोगोऽपि साधुः स्यादिति भावः। प्रत्येकमिति। यत्तु प्राचा " एकैकश" इत्युक्तं,तदयुक्तम्। शसैव वीप्साया उक्तत्वेन द्विर्वचनाऽयोगात्, ठयेन नाप्राप्तिन्यायेन द्विर्वचनापवादः श" सिति सिद्धान्तात्। तथा "सुपःर" इति सूत्रेऽप्येककैकश इति प्राचोक्तमयुक्तमेव। एतच्च मनोरमाग्रन्थानुरोधेनोक्तम्॥ अन्ये तु एकैकमेवैकैकशः, स्वार्थे शस्, न त्वत्र वीप्सायाम्। न च स्वार्थे यः शस् स आकरग्रन्थान्नावगम्यत इति वाच्यम्, ठएकां कपिलामेकैकशः सहरुआकृत्वो दत्त्वे"ति भाष्यात्, शसन्तस्य प्रत्येकमित्यर्थकत्वेन कैयटेन व्याख्यानाच्च स्वार्थिकस्यापि शसोऽवगम्यमानत्वात्। ततश्चैकैकश इति प्राचोक्तमयुक्तमिति यदुक्तं तदेवाऽयुक्तमित्याहुः।

**सूत्र- तान्येकवचनद्विवचनबहुवचनान्येकशः १।४।१०२**

लब्धप्रथमादिसंज्ञानि तिङस्त्रीणि त्रीणि वचनानि प्रत्येकमेकवचनादिसंज्ञानि स्युः ॥

सुविति प्रत्याहारग्रहणम्। प्रथमैकवचनात् सुशब्दादारभ्य सप्तमीबहुचनस्य सुपः पकारेण। अथ कपः पकारेणायं प्रत्याहार कस्मान्न विज्ञायते? सप्तमीबहुवचनस्य पकारस्य वैयथ्र्यप्रसङ्गात्। स ह्यनुदात्तार्थः स्यात्? प्रत्याहारार्थो वा? तत्रानुदात्तार्थो न भवति; अनुदात्तस्य सुपत्वादेव सिद्धत्वात्। तत्र यदि प्रत्याहारार्थोऽपि न स्यात् तदास्यापार्थकत्वमेव स्यात्। तस्मात् तेनैवायं प्रत्याहारो विज्ञायते, न तु कपः पकारेण; स्वरविधौ तस्य चरितार्थत्वात्॥

सुपः। सुप् प्रत्याहारः, षष्ठएकवचनम्। "तान्येकवचनद्विवचनबहुवचनान्येकशः" इति सूत्रं तानीतिवर्जमनुवर्तते। एकश इति। एकैकमित्यर्थः "सङ्ख्यैकवचनाच्च वीप्सायाम्" इति शश्। शसैव वीप्साया अबिधानात् "नित्यवीप्सयोः" इति द्वित्वं न। तच्च "सङ्ख्यैकवचनाच्चे"ति सूत्रव्याख्यावसरे प्रपञ्चयिष्यते। "तिङस्त्रीणि त्रीणी"त्यतः "त्रीणि त्रीणि"त्यनुवर्तते। तदाह--सुपस्त्रीणीत्यादिना।

सुपः। अत्र "तिङस्त्रीणि त्रीणि"--इति सूत्रात् "त्रीणि त्रीणी"ति पदं, ठतान्येकवचने"ति सूत्रं च "तानी"ति पदं विहायानुवर्तत इति व्याचष्टे--सुपस्त्रीणि त्रीणित्यादिना। एकश इति। एकैकमित्यर्थः। सङ्ख्यैकवचनाच्चे"ति वीप्सायां प्रथमान्ताच्छस्।

**सूत्र- युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः १।४।१०५**

तिङ्वाच्यकारकवाचिनि युष्मदि प्रयुज्यमानेऽप्रयुज्यमाने च मध्यमः स्यात् ॥

ठप्रहासे गम्यमाने" इति। यत्र भूतार्थाभावाद्वञ्चनैव केवलं तत्र वक्तुरभिप्रयाविष्करणेन प्रहासो गम्यते। "मन्योपपदे" इति।मन्यतिरुपपदमुपोच्चारितं पदं यस्य स तथोक्तः। मध्यमस्य धातोर्विधानात् धातुरन्यपाद्रथो विज्ञायत इत्याह--"धातोःट इति। "स चैकवत्" इति। यत्र द्वौ मन्तारौ बहवो वा तत्रायमेकवद्भावो विधीयते। अन्यत्र तु मन्तुरेकत्वादेवैकवचनं सिद्धम्। "मध्यमोत्तमयोः" इति। यथाक्रमं युष्मदस्मदोरुपपदयोः समानाधिकरणयोरप्रयुज्यमानयोरप्यर्थस्य विद्यमानत्वात्। यथा प्रत्युदाहरणेपूर्वकमुपपदग्रहणंयुष्मच्छब्देनाभिसम्बद्धमिहानुवत्र्तेतेतितन्मन्यतिनाऽशक्य

मभिसम्बन्धृमिति पुनरुपपदग्रहणं क्रियते। मन्यतेरिति श्यना निर्देशः, इत्यस्य तानादिकस्य ग्रहणं मा भूदत्येवमर्थः। तेनेनह न भवति-- एहि मनुषे रथेन यास्यामि न हि यास्यसि यातस्तेन ते पितेति। एवं हि मनोतेर्भवति॥

प्रहासे च। वाक्यद्वयमिदं सूत्रम्। "प्रहासे च मन्योपपदे इति प्रथमं वाक्यम्। मध्यम इत्यनुवर्तते। मनधातुः श्यन्विकरण उपपदं यस्येति बहुव्रीहिः। मन्यपदश्रवणबलाद्धाताविति विशेष्यं लभ्यते। तदाह--मन्यधातुरित्यादिना। तस्मिन्प्रकृतिभूते सतीति। तस्माद्धातोर्लस्य स्थाने इत्यर्थः। मध्यमः स्यादिति। "अस्मद्युपपदे" इति शेषः। अस्मद्युत्तमं इत्युत्तरसूत्रात्तदनुवृत्तेः। एवं च उत्तमपुरुषापवादोऽयं मध्यमविधिः। "मन्यतेरुत्तम एकवच्चे"ति द्वितीयं वाक्यम्। तद्व्याचष्टे-- मन्यतेस्तूत्तमः स्यादिति। "युष्मद्युपपदे" इति शेषः। पूर्वसूत्रात्तदनुवृत्तेः। स चेति। सः = मन्येतरुत्तमपुरुषः,द्वित्वबहुत्वयोरपि एकवचनं लभत इत्यर्थः। मध्यमोत्तमयोव्र्यत्यासार्थमिदम्। एतत्सर्वमनुपदमेवोदाहरणे स्पष्टीभविष्यति।

वाक्यद्वयमिदं सूत्रम्। "प्रहासे च मन्योपपदे" इति प्रथमं वाक्यम्। मध्यम इत्यनुवर्तते। मनधातुः श्यन्विकरण उपपदं यस्येति बहुव्रीहिः। मन्यपदश्रवणबलाद्धाताविति विशेष्यं लभ्यते। तदाह-- मन्यधातुरित्यादिना। तस्मिन्प्रकृतिभूते सतीति। तस्माद्धातोर्लस्य स्थाने इत्यर्थः। मध्यमः स्यादिति। "अस्मद्युपपदे" इति शेषः। अस्मद्युत्तमं इत्युत्तरसूत्रात्तदनुवृत्तेः। एवं च उत्तमपुरुषापवादोऽयं मध्यमविधिः। "मन्यतेरुत्तम एकवच्चे"ति द्वितीयं वाक्यम्। तद्व्याचष्टे--- मन्यतेस्तूत्तमः स्यादिति। "युष्मद्युपपदे" इति शेषः। पूर्वसूत्रात्तदनुवृत्तेः। स चेति। सः = मन्यतेरुत्तमपुरुषः, द्वित्वबहुत्वयोरपि एकवचनं लभत इत्यर्थः। मद्यमोत्तमयोव्र्यत्यासार्थमिदम्। एतत्सर्वमनुवपदमेवोदाहरणे स्पष्टीभविष्यति।